Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४२३९.

Title भाट्टदीपिका सप्तमाध्यायः

Author पार्थसारथि मिश्रः

Extent १० पत्र Age सं. १८७४

Subject मीमांसा

© Dharmartha Trust J&K. Digitized by eGangotri

गूढार्थदीपिकासप्तमाध्यायः

५२३५

5/10

© Dharmartha Trust J&K. Digitized by eGangotri

४२२९
१०५नि

सं. १८६५

१

शास्त्रदीपिकायां सप्तमोध्यायः पत्रे ९

© Dharmartha Trust J&K. Digitized by eGangotri

शा० १ श्रीगणेशाय नमः ॥ अतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारभावः स्यात् उपदेशविचारे समाप्तेऽधुनातदधीनसिद्धिरति
देशविचारः प्रस्तूयते तदुपोद्घाततेन प्रथममिदं विचार्यते । ये दर्शपूर्णमासयोर्ज्योतिष्टोमस्य च प्रकरणे समाम्नाताः प्र
याजादयो दीक्षणीयादयश्च ते किं सर्वयागार्थत्वेनोपदिश्यन्ते उत यथाप्रकरणं व्यवतिष्ठन्त इति । यदि सर्वार्थास्ततः सौर्यश्येना
दीनामप्युपदेशत एवाङ्गत्वलाभान्नातिदेशविचार आरब्धव्यो भवति । व्यवस्थिते पुनः सौर्यादीनां साकाङ्क्षत्वादतिदेशेन धर्मसद्भा
वतद्विशेषतदूहतद्बाधादिविचारार्थमुत्तरो ध्यायगण आरब्धव्यः । तदर्थमिदं विचार्यते किं यजिप्रयुक्ता धर्मा यथार्थाः प्रथमं यजि
भावनोद्देशेन विहिताः सन्तः पश्चात्तत्करणिकयापूर्वभावनयान्तद्वारेण संबध्यन्ते उतापूर्वप्रयुक्ता अपूर्वार्था अपूर्वभावनाया
प्रथममित्थंभावेनान्विताः पश्चात्करणभूतस्य यजेरनुग्राहका भवन्तीति किं प्राप्तं धर्माणां करणाङ्गत्वे विचारो नैव विद्यते । भा
वनान्वयपक्षे च तादर्थ्यं नावकल्प्यते । अपूर्वं भावनया हि संबध्यमाने करणे इतिकर्तव्यतेतुल्यकल्पे स्यातां न करणाङ्गत्वमितिक
र्तव्यतायाः स्यात् । तस्मात्करणोद्देशेन विधातव्याः । केन पुनः करणमुद्दिश्यते । केचिदाहुः । प्रकरणाम्नानानुमितेन वाक्येनेति ननु राम १

© Dharmartha Trust J&K. Digitized by eGangotri

तेन प्रकृतस्यैव दर्शपूर्णमासादेरुद्देशात्कथं सर्वार्थत्वं । उच्यते । प्रकृतस्याप्युद्देशकत्वेन यजतिरेवात्र कल्प्यः । स च स्वसामर्थ्यात्सर्वया
गानुपस्थापयन्सर्वयागार्थतां नयति । न चैतस्मिन्पक्षे दर्शपूर्णमासवाक्यस्य समिदादिवाक्यानां चैकवाक्यं चैकवाक्यत्वं संभवति ये
न सर्वैः संहत्य समिदादिविशिष्टदर्शादिविधानाद्यागांतरे धर्मा निरस्युः । तथा सति करणस्य फलं प्रत्युपादानादंगानि प्रति चोद्देशादेरू
पं स्यात् स्यां ते सकलवाक्ये फलं प्रति यागं विधाय पर्यवसिते पश्चाद्वाक्यैः समिदादिभिरनुमितयजुरुद्देशकशब्दयुक्तैरंगानि विधीयं
ते । न च प्रकरणादुद्देश्योपजीविविशेषणं शक्यते । आकांक्षारूपस्य प्रकरणस्याविशेषकत्वात् । संनिधेश्च यजिश्रुतिजनिताविशेषप्रस
येन बाध्यमानत्वात् । तस्मात्सर्वार्थादिति । भाष्यानुसारिणस्त्वाहुः । दर्शपूर्णमासादिवाक्यमेव यजीनामुद्देशकं । नहि तद्यागोत्पत्ति
परं । आग्नेयादिवाक्यैरेवोत्पन्नत्वात् । न च फलसंयोगार्थं । सर्वेभ्यो दर्शपूर्णमासौ सर्वेभ्यो ज्योतिष्टोम इति स्वर्गकामार्थत्वस्याविशि
ष्टत्वात् । तस्मादनन्यार्थत्वादनेन फलवतो यागाननूद्य धर्मा विधीयंते । न चोद्देश्यदर्शपूर्णमासशब्दः स्वर्गकामशब्दो वा शक्नो
ति विशेष्टुं । तस्मादधिकृतमात्रोपलक्षणं स्वर्गकामशब्दः । दर्शपूर्णमासशब्दश्च प्रायेण पर्वकालत्वाद्यागानामनुवादः । न च

© Dharmartha Trust J&K. Digitized by eGangotri

स्व०
२

संनिधेराग्नेयादीनामेवोद्देशः। अतिजनिताविशेषप्रत्ययविरोधादित्युक्तं प्राक्। तस्माद्यजिप्रयुक्ता धर्माः सर्वार्थाः। किंचाग्नेयादिभिर्द्र
व्यैः प्रत्यस्तं यजिर्निर्वर्त्तितेनापूर्वं। अत एवातस्योपि यजिनिर्वृत्ता एवाग्नेयादीनामेवोपकुर्वंति। तस्मान्नेतावद्युज्यर्थाः। तत्सामान्यादित
रेष्वतथात्वं। यद्यपि यजिविशेषं प्रतिधर्मविधिर्यद्यपि च भावनयासंबंधस्तथापि पारिप्लवः। तद्रूपतायागांतराणां भावनांतराणां च।
तद्यथा लोके ब्राह्मणोयमतिथिर्यवान्नेन परिवेष्टव्य इत्युक्ते यद्यपि ब्राह्मणविशेषं प्रति यवान्नं श्रुतं तथाप्यन्येषामपि ब्राह्मणानां य
वान्नप्रियत्वं गम्यते तद्वद्यजिरूपस्य व्यक्तिविशेषस्य यजिकरणस्य च भावनाविशेषस्योक्ता धर्मास्तद्रूपाणामन्येषामपि साधारणा
इति शक्यमवगंतुं। तस्मात्सर्वार्थाधिमर्द्दित्सनारभ्योतिदेशे विचार इति प्राप्तेभिधीयते। प्रधानविधिवाक्यं खल्वंगवाक्यसमन्वितं।
अंगप्रधानसंयुक्तां विधत्ते पूर्वभावनां। भावनान्वयतः पश्चाद्देशपौरार्थिकोन्वयः। ततः कर्मांतरेणांगप्राप्तिरशंक्यते कुतः। भाव
नान्वयितामात्रान्नांशयोस्तु [illegible]स्य कल्पता। अपरिसमाप्तरूपत्वाद्गुणप्राधान्यसंभवात्। यथा फलं भवनयाथन्वीयमानं फलत्वाप
रित्यागात्प्राधान्यं प्रतिपद्यते तथा करणमपि करणात्मनासंबद्धं फलं प्रति गुणत्वमिति कर्तव्यतां च प्रति प्राधान्यं। एवमेवाहि

एम
२

देशाविशेषस्थः

© Dharmartha Trust J&K. Digitized by eGangotri

करणं यत्फलोद्देशप्रवृत्तकर्तृव्यापारेण फलसाधनतामापद्यते ॥ इतिकर्तव्यतात्वेन व्यापारविशेषेण करणस्य फलसाधनरूपत्वमुपजन्य
ते स उच्यते। तस्मान्न तुल्यकक्ष्यत्वं। न च प्रयाजिः स्वयमित्थंभावापेक्षो नापि यागभावना निर्ज्ञातप्रकारत्वात्। अपूर्वभावनायास्त्वनिर्ज्ञा
तप्रकारत्वात्तद्भावना कीदृशीति निरूप्यते। यागेनापूर्वं कुर्यादित्ययमर्थः। यथा त्वा प्रत्ते यागादपूर्वं भवति तथा व्याप्रियेतेति। कीदृशो
सौ व्यापार इति भवति व्यापारविशेषापेक्षा। तद्विशेषत्वेन समिदादिव्यापारविधानमपेक्षासंनिधियोग्यत्वैरध्यवसीयते। तस्मा
त्प्रकृतभावनाविशेषत्वात्समिदादीनां पारिप्लवत्वं व्रीह्यादिद्रव्यमपि फलभावनांशेन संबध्यते यथा हि क्रियया यागात्स्वर्गोऽपू
र्वं भवति सा फलभावना यागस्वरूपसंपादनमपि तदंशं एव। अनिष्पन्नस्य साधनभावासंभवात्। अवघातादयोऽपि तत्रैव व्रीहीणां
योग्यतामादधाना भावनार्था एव। न च यथा द्वीकयवान्नवत्साधारण्यानुमानं। लोके हि प्रमाणान्तरवशात्तथावगम्यते। शब्दैक
प्रमाणे तु विशेषान्वये शब्देनावगम्यमाने पारिप्लववाक्ता हृसमात्रं। तस्माद्यथाप्रकरणं व्यवस्थिता धर्माः। ततश्चानुपदिष्टधर्म
केषु सौर्यादिष्वतिदेशेन धर्मसङ्क्रान्त्यादि विचारयितव्यं। तथा चोक्तं प्राकृतात्कर्मणो यस्मात्तत्समानेषु कर्मसु। धर्मप्रदेशो येन स्या

© Dharmartha Trust J&K. Digitized by eGangotri

स्रा० २ ३

सोतिदेशइतिस्मृतइतिश्लोकमप्युदाहरंतीति। अथमत्रानयः। प्राकृतात्कर्मणोधर्मप्रदेशोयेनस्यात्सोतिदेशः कुधर्मप्रदेशइत्यपेक्षायामा
ह। यस्मात्तत्समानेष्विति। यस्मात्प्राकृताद्दाग्नेयादेर्धर्माः प्रदिश्यंतेतत्समानेषुसौर्यादिषुकर्मस्विति। त्रिविधश्चातिदेशः। प्रत्यक्षवच
नान्नामधेयाच्चोदनालिंगानुमितवचनाच्च। तत्रप्रत्यक्षवचनात्तावच्चिंत्यते १ समानेपूर्ववत्वादुत्पन्नाधिकारःस्यात्॥ दृषावेकाहेज्योति
ष्टोमविकारे·दृषुविष्टुतिंकरोतिसप्तदृंभवतीतिप्राकृतानांस्तोत्राणांविकारंविधायश्रूयते· समानमितरत्श्येननेति। तत्रसंशयःकि
मनुवादउतश्येनवैशेषिकाणामतिदेशविधिरिति। तत्रेतरशब्दःसंन्निहितवचनत्वाच्छ्येनवैशेषिकाणांचासंनिहितत्वान्नतद्वाचकः सो
दकप्राप्तास्तुज्योतिष्टोमधर्मास्तेचश्येनेपिविद्यमानास्तत्तादृश्यमिषोरापादयंतीतिनदपेक्षोयमनुवादइतिप्राप्तेब्रूमः॥ सत्यमितरश
ब्दःसंनिहितमभिधत्तेनतुतन्मात्रं किंतुपूर्वनिर्दिष्टसदृशंसंनिहितंचयत्तद्युक्तमभिधत्ते। नहियत्संनिहितंज्योतिष्टोमिकंनतत्पूर्वोक्त
सदृशमप्राकृतानांसप्तदशादीनांपूर्वमुक्तत्वात्। यत्वप्राकृतंलोहितोष्णीषादिश्येनवैशेषिकंतद्यद्यप्यसंन्निहितंतथापिसादृश्यमस्तीत्यव
श्यहानव्यमनतरस्मिन्वचनार्थवत्तायसंनिधिंहित्वासादृश्यपरिग्रहेणश्येनवैशेषिकाणांवादः। यद्वाचोदकप्राप्तानांविष्टुत्यादीनांविका राम २

© Dharmartha Trust J&K. Digitized by eGangotri

सपत्वशात
नसमर्थो
ऽपि

रः श्रुति श्रुतिमित्यादिना पूर्वं विहितस्ततरस्तरन्नोदकमामामित्यत्र श्येनो दिश्यते तस्य लोहितोष्णीषादिविकारः श्येनादतिदिश्यते। एवं संनि
हितवचनत्वमर्थवत्त्वं च वचनस्य भविष्यति २ पंचसंचरेष्वर्थवादातिदेशः सन्निधानात् चातुर्मास्येषु चत्वारि पर्वाणि वैश्वदेवं वरुण
प्रघासाः साकमेधाः शुनासीरीयमिति। तत्र वैश्वदेविकानामाग्नेयादीनां पंचानां हविषां यद्ब्राह्मणं तद्वारुणप्रघासिकेषु पंचस्वतिदिश्यते एत
द्ब्राह्मणान्येव पंच हवींषीति। तत्र संशयः। किं यत्तेषामर्थवादः वार्त्रघ्नानि वा एतानि हवींषीत्यादिस्तन्मात्रस्यायमतिदेशः सैवैषां प्र
शंसेति उतार्थवादस्यांगविधीनां च नवप्रयाजादीनामतिदेश इति। पूर्वेषां ब्राह्मणं यत्तदुत्तरेष्वतिदिश्यते। चोद्यंते येन वाक्ये
न तत्तेषां ब्राह्मणं मतं। अंगविधिभिः सांगान्येव विधीयंते न हवींषि॥ सार्थवादकं तु वाक्यं तेषां विधायकमिति भवत्यर्थवादस्य
तत्संबंधः। तस्मात्तन्मात्रातिदेशः। नैवं। यद्यपि सांगविधिभिर्हविषां न विधेयता। तथाप्यस्त्येव संबंधस्तत्संबंध्यंगचोदनात्। किंचांग
वाक्ये कथाकथंतामापन्नं प्रधान[redacted]वाक्यं हविषां समग्राणां विधायकमिति विधायकत्वेनाप्यस्त्येवांगविधीनां संबंधः। तस्मात्सर्वेषाम
तिदेशः ३ एककपालैंद्राग्नौ चानतहत। वैश्वदेवे तावत् द्यावापृथिव्य एककपालः वरुणप्रघासेषु काय एककपाल ऐंद्राग्नो द्वादशकपाल

© Dharmartha Trust J&K. Digitized by eGangotri

शा० श्चा। ततः साकमेधेषु श्रूयते। ऐंद्राग्न एकादशकपालो वैश्वकर्मण एककपाल इति। तत एतद्ब्राह्मण ऐंद्राग्न एतद्ब्राह्मण एककपाल इत्यंशे तां त
४ स्पर्शवत्त्वार्थवादवस्य सांगविधिकस्य कृत्स्नकांडस्यातिदेशकमित्युत्तरविवक्षया भाष्यते ४ एककपालानां वैश्वदेविकः प्रकृतिराग्रयणे
सर्वहोमापर्याप्तिनिदर्शनाद्दवभृथे च सकृद्यु वदानस्य वचनात् एतद्ब्राह्मण एककपाल इति किं वैश्वदेविकस्यैककपालस्य ब्राह्मणम
तिदिश्यते किं वा वारुणप्रघासिकस्येति संशये वारुणप्रघासिकेः स्यमप्राकृतं वैश्वदेविके बहु। तस्मान्नदतिदेशोऽयं वचनस्य बहु फलत्वाये
ति प्राप्ते ब्रूमः। वारुणप्रघासिकस्याव्यवहिततादेतद्ब्राह्मण ऐंद्राग्न इत्यनेनानिः संदिग्धवारुणप्रघासिकब्राह्मणनिर्देशेन समभिव्या
हाराद्वैश्वदेविकस्य तु व्यवहितत्वात्तद्धर्माणां च स्तरतामेककपालामिष्टामिति वक्ष्यमाणरेवन्यायात्प्राप्तत्वात् तद्विषयत्वे वचनानर्थक्याप्र
संगाद्वारुणप्रघासिकैककपालब्राह्मणस्यायमतिदेशः ५ इति शास्त्रदीपिकायां सप्तमस्य प्रथमः पादः साम्नोभिधानशब्देन प्रवृ
त्तिः सा यथाशिष्टं कवतीषु रथंतरं गायतीत्यत्रानेन रथंतरशब्देन किं कवतीषु तिदिश्यत इति परित्यानार्थे रथंतरादिशब्दाः किं गी
तिविशिष्टानामभिधानाश्रय उत ऋचामक्षराणां वाचकाउत गीतिमात्रस्येति चिंत्यते। द्वितीये तु मंत्रलक्षणं कुर्वता गीतिः सामेत्येतावद्युक्तं न तु एम ४

© Dharmartha Trust J&K. Digitized by eGangotri

पपादितं इत्थमतिदेशविषयसिद्ध्यर्थं गौणीति विषयत्वमेव न्यायेन दृष्टान्त्रियतेत गौणी निविशिष्टायाम् चि प्रयोगादर्शनत्वं विशिष्टवचनत्वे वि
शेषणभूतगौण्यभिधानस्यावश्यकत्वात्तदभिधाने च तत एव तदविनाभूतायाम् चि प्रतिपत्तिसिद्धेरभिधानशक्तिकल्पनानुपपत्तेर्गौणीतिम
त्रमेषामभिधेयं। अतो भिवत्सां यो गौणीति विशेषस्तस्य च वसादिष्वतिदेशः। इति शास्त्रदीपिकायां सप्तमस्य द्वितीयः पादः। उक्तं क्रियाभि
धानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात् इदानीं नामातिदेशः प्रस्तूयते। कुण्डपायिनामयने श्रूयते मासमग्निहोत्रं जुहोतीति॥ तन्नैय्यमि
काग्निहोत्रात्कर्मान्तरमिति स्थिते संशयः। किमयमग्निहोत्रशब्दो नैय्यमिकाग्निहोत्रधर्माणामतिदेशक उत नेति। उभयोरविशेषेण सा
मानाधिकरण्यतः। नामधेयमिदं तस्मान्न धर्मानतिदेक्ष्यति एकस्य त्वभिधेयत्वे गौणत्वेनापि संभवात्। नान्यस्याप्यभिधेयत्वमनेका
र्थत्वदोषतः। न चागत्युमाणविशेषत्वं। नैयमिके ग्नये होत्रमित्येवं प्रवृत्तिनिमित्तं संभवति। इतरस्य त्वग्निदेवत्यत्वं नावगतं। अधर्मक
त्वकौण्डपायिनः। तद्वचनत्वे सति न गौणत्वं नैयामिकस्य युज्यते। नैयमिकस्तु धर्मवान्। ततस्तन्नामेदं तत्सादृश्यविधित्सयान्यत्र प्रयु
ज्यते। सादृश्यं च धर्मनिमित्तं। अतो धर्मातिदेशो यं मासमग्निहोत्रं जुहोतीति १ अपि वा सतत्र कर्मणि गुणार्थैषा श्रुतिः स्यात् दादृश्या

© Dharmartha Trust J&K. Digitized by eGangotri

ज्यो० हेमप्रथममहः प्रायणीयोतिरात्रः गवामयनेपि प्रथमेहनि वैश्वानरो ज्योतिष्टोमः प्रायणीयमहर्भवतीति प्रायणीयशब्दः प्रयुज्यमानः किं द्वा

५ दशाहिकधर्मान्निर्दिशेन्नेति संशये सर्वत्रातिदेशो प्राप्तोभिधीयते। प्रायणीयपदं येन निमित्तेन प्रवर्त्तते। प्राथम्येन तरस्यैव गावा

5 मयनिकेपि नः। तस्मात्सिद्धनिमित्ते नच्छ्रुत्यानामत्वसंभवात्। नगौणत्वेन धर्माणामतिदेशो वकल्पते २ विश्वजिति सर्वपृष्ठेतत्पूर्व

कृत्वा ज्योतिष्टोमिकानि पृष्ठानि स्तोत्रपृष्ठशब्दः विश्वजित्सर्वपृष्ठो भवतीति। अत्र संशयः किमयं सर्वपृष्ठशब्दोनुवादः उत बृहद्र

थंतरयोर्विकल्पेन प्राप्तयोः समुच्चयविधिरथवा षाडहिकानां रथंतरबृहद्वैरूपवैराजशाक्वररैवतानामिहातिदेश इति॥ तत्र ज्योतिष्टो

मे माहेंद्रे स्तुचतुष्टुस्तोत्रेषु सप्तदशानि पृष्ठानीति पृष्ठशब्दप्रयोगात्सर्वेषां पृष्ठत्वं। तेषां चेह चोदकात्प्राप्तेः सर्वपृष्ठत्वं सिद्धमेव विश्व

जितः। तस्मादयमनुवादः। नैवं। बृहद्रथंतरसाधनकमाहेंद्रस्तोत्रवचन एव पृष्ठशब्दो लिंगसमवायाच्चतुर्षु प्रयुक्तस्तस्मान्न ते

षां पृष्ठशब्दवाच्यत्वमिति अप्राप्ता सर्वपृष्ठता चोदकेन। अतो नानुवादः चोदकेन तु विकल्पेन प्राप्तयोर्बृहद्रथंतरयोः पृष्ठयोः स

र्वत्वं समुच्चयो विधीयते। नैवमपि युक्तं। सर्वशब्दस्य बहुत्वापेक्षत्वाद्द्वयोरप्रवृत्तेः। तस्मात्षाडहिकानां पृष्ठानां ज्योतिष्टोमविकार एव वि एम ५

© Dharmartha Trust J&K. Digitized by eGangotri

अजितिवचनादतिदेशः। कः पुनर्वचनातिदेशस्यात्रसंबंधः। नहिसर्वत्रैषशब्दः यद्दहनामधेयंसदिहगुणवृत्त्याप्रयुक्तंयतस्तन्निमित्तोऽतिदे
शइतिसंगच्छेत। सत्यमेवं। कर्मसमानाधिकरणपदनिमित्तोयमतिदेशइतिनामाधिकारेचिंतितः। परमार्थतस्तुवाचनिक एवायमतिदेशः
३ तथावभृथःसोमात् वरुणप्रघासेषुश्रूयते। वारुणेपेनिष्कासेनतुषैश्चावभृथंयंतीतितत्रकिमवभृथशब्देनापांप्युत्सेकंदार्शपौर्ण
मासिकंचोदकुश्रामनूघृतत्रतुषनिष्कासंविधीयतेऽथवासौमिकावभृथधर्मकंकर्मांतरमितिसंशयेऽपांप्युत्सेकेप्यवभृथशब्दप्रयोगा
त्तदनुवादः। ननुतत्रगौणोवभृथशब्दः। नचेहगौणग्रहणंन्याय्यं। तुल्यमिदंतवापिगौणत्वं। अपिच। ममानुवादेगौणः तवतुविधौतस्मा
दपांप्युत्सेकेगुणविधिः। सत्यंममापितुल्यत्वमस्तितत्तुप्रमाणवत्। कर्मांतरेप्रयुक्तत्वात्भवतस्त्वप्रमाणकं। गौणत्वंनहिशब्दस्यस्वरसा
दवगम्यते। अर्थांतरेप्रयोगेतुनिश्चितेगौणताभवेत्। नचेहापांप्युत्सेकपरत्वेऽवभृथशब्दस्यप्रमाणमस्तियंतीत्यनेनतुप्रकरणांतरस्था
येनकर्मांतरंविधीयतेतत्रप्रयुज्यमानोवभृथशब्दोमुख्यावभृथसादृश्यंविदधत्तद्धर्माननतिदिशतीतिन्याय्यं ४ द्रव्यादेशेनद्रव्यं
श्रुतिसंयोगात्पुरोडाशस्तनादेशेनतस्यश्रुतित्वात्। यदिदंकर्मांतरंतत्किंपुरोडाशद्रव्यकमुततुषनिष्कासद्रव्यकमितिविचारःतत्र

© Dharmartha Trust J&K. Digitized by eGangotri

शा० ६

वभृथशब्देनमत्स्यक्षेण पुरोडाशादिधर्मप्राप्तेस्तद्दिशिष्टकर्मविधिपरेणावतुषनिष्कासस्य वाक्यभेदाद्विधातुमशक्तेः पुरोडाश एव द्रव्यं
स्यात्। अपूर्वकर्मविधिना नैकेषामपि चोदनात्। अन्यथा तुषनिष्कासपदानर्थक्यदोषतः। तद्विशिष्टविधित्वेन तु पुरोडाशस्य बाधनं
। अस्या हि तुषनिष्कासं विशेषे स्याच्च चोद्यते। अवभृथशब्देन तु गौणेन सदृशविभ्रमथ धर्मसाधारणेन च पुरोडाशस्य प्राप्तिः। तस्मात्तस्य
बाधः ५ गुणविधिस्तु न गृहीतत्वात्समत्वात् आतिथ्यायां वैत्सवेन नवकपालो भवतीति श्रूयते। तत्रैवाख्यावाच्या दयः केचिद्धर्मा
विहिताः। राजसूये वैत्सवस्त्रिकपाल इति श्रूयते वैत्सवशब्दः किमातिथ्याधर्मानितिदिशेन्नेति संशये अग्निहोत्रन्यायेनातिदेशं मन्वान
स्योत्तरं। अस्या वैत्सवशब्दो न तद्विकारत्वमिति प्राप्ते ब्रूमः। अनन्यगतिभ्यो लिंगेभ्यः स्वरसामादिचोदनाशब्दोपबृंहितेभ्यस्तद्विकार
त्वं। लिंगानि च भाष्य एवादर्शितानि १० कर्मजे कर्मयूपवत्॥ कर्मनामधेयानामग्निहोत्रादिशब्दानामुक्तमनिदेशकत्वं। यौगि
कानां प्रायणीयपादिशब्दानां गुणविधीनां च वैत्सवादिशब्दानां लिंगविशेषशून्यानां नास्त्यतिदेशनिमित्तत्वमित्युक्तं। कर्मनामव
देव संस्कारनाम्नां यूपादीनां सिद्धमेवातिदेशनिमित्तत्वं। इदानीं वासःप्रभृतीनां संस्कारनिमित्तत्वमेवास्ति नास्तीति चिंत्यते। वासो राम ६

© Dharmartha Trust J&K. Digitized by eGangotri

ददास्यतो ददानीति। किं दानं तक्षणं च कृत्वा वासोऽनश्य निष्पाद्यैव तद्दातव्यमुत यथासिद्धमेव दातव्यमिति संशयः। तत्र दानतक्षणक्रि
यायां सत्यां शब्दप्रयोगात्क्रियानिमित्तो वासः शब्दोऽनः शब्दश्च क्रियामेव दानांगतया विधत्ते। तस्मात्सानुष्ठेया दानं कुर्वता। एवं प्राप्ते ब्रू
मः। जातिशब्दावेतौ जात्यन्वयव्यतिरेकानुविधानात्। जातिस्तु क्रियाभिव्यंग्येति तदुत्तरकाले शब्दप्रयोगः। न तु शब्दः क्रियावाची। तस्मान्न
क्रियानिर्देशकत्वं शब्दयोः ११ विशये लौकिकं स्यात्सर्वार्थत्वात्‌ न वैदिकमर्थनिर्देशात्‌ अग्निमुपनिधाय स्तृणीतेति किमाधा
नसंस्कृतोऽग्निराहवनीयादिरूपाभिधेय उत लौकिक इति संशये संस्कृतस्य प्रयोजनापेक्षत्वात्सामान्यवचनोऽप्यग्निशब्दस्तद्विषयत्वे
नगम्यमानः संस्कारमुपधानांगत्वेनातिदिशतीति प्राप्ते ब्रूमः। वह्निमात्राभिधायित्वान्न संस्कारातिदेशनं। होमादिभिः फला
पेक्षा संस्कृतानां निवर्तिता। यदाहवनीये जुहोति गार्हपत्ये हवींषि श्रपयतीत्यादिभिराहत्य प्रयोजननिर्देशान्न प्रयोजनांतरमा
हवनीयाद्यपेक्षं तथातोऽग्निशब्दोऽपि जातिमात्रवचनत्वात्तज्जातीयं यत्किंचिदाक्षिपन्लोकसिद्धमेवोपादाय कृतार्थो न
संस्कृतमपेक्षते। तस्माल्लौकिक उपनिधेयः १२ संस्कृतं स्यात्तच्छ्रुतत्वात्॥ उपशयो यूपो भवतीत्यत्र संशयः किमुपशये यूपसं

© Dharmartha Trust J&K. Digitized by eGangotri

स्मृ० ७ स्काराः परिव्याणास्यः कार्यानिति। तत्र यूपशब्द उपशयेप्रयुज्यमानस्तानतिदिशेत्। सत्यं। यदि यूपत्वं विधीयेत। विधायकाभावात्। व
र्तमानापदेशोयं यूपो भवतीति। तस्मादनुवादोयमुपशयमुपशयस्तत्यर्थः यूपधर्माः केचिच्छेदनादय उपशये वचनादनुष्ठीयंते तेन
निमित्तेन गौणोयं वादः १३ कर्मणः पृष्ठशब्दः स्यात्तथाभूतोपदेशात् अग्नौ श्रूयते पृष्ठैरुपतिष्ठतइति। तत्र संशयः किं पृष्ठशब्दो
ज्योतिष्टोमिकपृष्ठधर्मातिदेशकः पृष्ठधर्मकाणि कर्माणि कुर्यादिति: तानि पृष्ठसाध्यानि वस्तुत्स्यात्मकानि भवंति उत पृष्ठसाधने
षु रथंतरादिषु पृष्ठशब्दस्तैरग्नेरभिधानं चोद्यतइति॥ तत्र॥ उपतिष्ठनातावदपूर्वं कर्म चोद्यते। पृष्ठशब्दो पितस्यैव विधत्ते पृष्ठतु
तां। उपतिष्ठति धातुः समिपस्थिति वचनः प्रत्ययो भाववाची। तस्यमर्थः। अग्निसमीपेतिष्ठ पृष्ठसदृशैः कर्मभिः कुर्यादिति। य
दितभिधानं विधीयते न तत उपतिष्ठतिः समीपवचनः सन्नभिधानं लक्षयेत् पृष्ठशब्दो पितत्साधनाभिसुभयोर्लक्षणा स्यात्। अ
स्मत्पक्षे पुनः पृष्ठशब्द एव धर्मलक्षणो निज्यायानयं पक्षः। उच्यते। जघन्यवृत्तिना पृष्ठशब्दस्यहोभयोः समा। उपतिष्ठति धातुश्च स
मीपस्थिति वाचकः। न वयं धातुनाभिधानं लक्षयामः। किं तु समीपस्थितिरेव धातुनाभिधीयते। सा तु समीपस्थितिरभिधानार्थेति ब्रू राम ७

© Dharmartha Trust J&K. Digitized by eGangotri

मदे। कथं मंत्रकरणेर्थे वर्तमानादुपपद्यतेति एतेनात्मनेपदं भवति। समीपस्थितिश्चानेनाभिधीयते। तेन यथा समीपस्थितो मंत्रः करणं त
थापतितव्यं। नत्वाभिधानादन्यत्र साक्षान्मंत्रः करणं। तद्यदीमं येमीपस्थितिरभिधानार्थस्यात्ततोस्याः करणं मंत्रः संपद्यते। प्रधानाधीनं
ह्यतेरंगानुष्ठानं भवति। अतोभिधानार्थत्वे समीपस्थानस्याभिधानं कुर्वन्मंत्रः समीपस्थितेः करणमिति शक्यं वक्तुं॥ अतोभिधानाय स
मीपस्थितिं वदन्नुपतिष्ठतिर्मंत्रकरणार्थो भवन्नात्मनेपदं लभेत। तेनात्मनेपददर्शनादुपस्थानप्रयोजनभूतमभिधानमनुमीयते। तद
यमर्थः। पूर्वसाधनैरग्न्यंतराभिः समीपे स्थिताग्निममिंद्ध्या इति॥ तस्मादभिधानचोदनेति सिद्धं १४ ॥ इति शास्त्रदीपिकायां सप्त
मस्य तृतीयः पादः इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वं गतोनामातिदेशः। इदानीमानुमानिकेन वचनेनातिदेश उच्यते सौर्यं चरुं निर्वपे
द्ब्रह्मवर्चसकामस्याग्नेयवदाहरणं। तत्र प्रथमं तावदिदं चिंत्यते किमत्र कृतार्थेद्धर्माः प्रदिश्यंते नेति। प्रमाणाभावान्नातिदेशः॥ उच्यते॥
यागेन भावयेद्ब्रह्मवर्चसमिति भावनामितिकर्तव्यतापेक्षामुपादिश्य पश्चात्स्या धर्मोपदेशे न तस्यादितिकर्तव्यतायाः प्रसमर्पणभूतमन्यतः
सिद्धेतिकर्तव्यताशास्त्रेणांगीकृतेति निश्चीयते। अस्ति चान्यत्र लौकिके पार्वणस्थालीपाकादौ वैदिके दर्शपूर्णमासादौ। तयोरन्यतरादिह

© Dharmartha Trust J&K. Digitized by eGangotri

स्मृ० ८ किंप्रदिश्यतइतिस्थितेइदमभिधीयते। लौकिकी वैदिकी चेति। वैदिकी हि निबद्धत्वान्नेतुं नान्यत्र शक्यते। लौकिकी त्वनिबद्धत्वात्सर्वत्रैवानुषज्यते॥ वैदिकी
तिकर्तव्यता प्रत्यक्षेण शास्त्रेण दर्शपूर्णमासादिषु निबद्धा नान्येन संबंद्धुं शक्यते। न हि प्रकृतमितिकर्तव्यता ब्राह्मणं दर्शपूर्णमासयोरि
तिकर्तव्यतां विधाय पुनः सौर्यादिष्वपि विदधातीति संभवति। न च साधारण्येन विधानं। प्रकरणेन व्यवस्थितत्वाद्विधानस्य। न च शास्त्रमंत
रेणेतिकर्तव्यतान्वयः संभवति। तस्मान्न वैदिकी। लौकिकी तु पार्वणाष्ट—कादिषु बद्धेष्वनुवृत्ता साधारणं शास्त्रमनुमापयति। तेन सैव सौ
र्यादिषु स्यात्। प्र—याजादिदर्शनं तु यत्र नित्यानुवादवचनानीत्येवं परिहृतं। तस्माल्लौकिकीति प्राप्त उच्यते। वैदिकी वैदिकत्वेन सामा
न्येनोपतिष्ठते। लौकिकी त्वसमानत्वान्नोपस्थास्यत्यपेक्षिता। वैदिकस्य तु कर्मणः कथंभावापेक्षायां वैदिक एवेत्थंभावः शीघ्रमुप
तिष्ठते इति क्रमेणानुपस्थितलौकिकग्रहणमयुक्तं। यद्यप्यनुमिताद्द्रष्टा लौकिकोपि तु वैदिकः। प्रत्यक्षवेदविरहान्नैवासौ सद
शो मतः। ननु सोपि वेदः केषांचित्प्रत्यक्ष एव। नित्यानुमेयमूलनिराकरणात् सत्यं। तथाप्यसदृश एव। कथं। वैतानिककर्माधिकारे
हि त्रयी प्रवर्तते। तन्मध्ये तु प्रसंगाद्वैतानिकं किंचिदुच्यते तेन दर्शपूर्णमासादीनां सौर्यादीनां च तदधिकारेण त्रयी प्रवृत्तिर्नाभावो राम ८

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मादस्त्येवमस्ति। निर्वैदिकस्योपस्थानं। किं च सौर्यादौ निर्वैशानिकेष्वोपप्रवर्तते। लौकिकी त्विति कल्पिता आचारादौपासने कर्तव्या। तत्र प्र
धानवैदेशपमंगानामापद्यते। तस्मादपि वैदिकी। न च निबद्धत्वात्सौनान्यत्रनेतुं शक्येति मंतव्यं। समानविधानत्वेत्वपंशेषः स्यात्। अ
तिदेशेन तन्यत्रगतो निबद्धत्वं गुण एवा नहि क्वचिदनिबद्धान्यत्रातिदेष्टुं शक्यते। न चानुमानेन लौकिकी शक्याकल्पयितुं गणयागादि
षु तत्स्वभावेनानैकांतिकत्वात्। तस्माद्वैदिक इत्थंभावः सौर्यादिष्वतिदिश्यते सचाच धातप्रयाजादिपदार्थजन्यदृष्टादृष्टात्मकोपकारवर्ग
रूपितस्तेषामुपकाराणां पदार्थानां च प्रापको भवति॥ नद्विधापि च शास्त्रमर्थात्सौर्यादिवाक्यस्य शेषभावमुपगतं भवतीत्यनेनाभि
प्रायेण विध्यंतो वा प्रवर्तेत चोदनायामित्युक्तं। अस्तु वा विध्यंतस्यैवातिदेशः। प्रकृतिसंबंधितया निरूपितरूपस्यातिदेशो न तु
यथापाठमेव शास्त्रं प्रकृतिवद्विकृतेरपि संभवति। यथा। उरु प्रथोनस्यानामिति चोद्यते तथापि ब्राह्मणमेवातिदिश्यते तद्ब्राह्मणान्ये
वपंचदवींषीति तत्राप्यन्यसंबंधिनः सतस्तेनैव रूपेणातिदेशादूहादिसिद्धिः। यदि त्वग्नये जुष्टं निर्वपामीत्यनेन रूपेण सौर्येप्रा
प्येत ततोऽग्निपदस्य देवतापरस्य चासंप्रतिपन्नरूपत्वाद्देवतापदविवेकस्यैव तत्साधितमग्निपदरूपं त्वविवक्षितमिति न शक्यमास्था

© Dharmartha Trust J&K. Digitized by eGangotri

श्र० ९

तुं।अग्निपररूपमेवतुविवक्षितमित्यापद्येततसोनसूर्यपदंप्रक्षिप्येतनाग्निपदंबाध्येत।अतोनोहःसिद्धोन्नबाधः।परित्तुप्रकृतौनिरूपि
तरूपस्यशास्त्रस्याविकृतिसंबंधस्तदाप्रकृतावग्निपदस्यदेवतापररूपसंप्रतिपत्तेर्देवतापररूपमात्रमत्राविवक्षितंदृष्टार्थत्वान्नाग्नि
पदरूपमदृष्टार्थत्वाद्देवतापराधिजिगांसयानांतरीयकत्वादग्निपरमर्थीनमिनिनिश्चीयते।तत्रसौर्येतद्रूपपमंत्रातिदेशादमाग्निप
दस्यचानद्रूपत्वात्स्वरूपस्यचाविवक्षितत्वान्निवृत्तौसत्यांदेवतावाचिनःसूर्यपदस्यप्रक्षेपादूहबाधौसिद्धौभवतः।तस्माद्देरिक्तातिदेशः
॥९॥द्वादशाहमहर्गणातत्प्रकृतितादैकाहिकमधिकागमान्तरास्यंस्यादेकाहवत्॥इदानीमानुमानिकवचननामधेययोर्बलाबलंचिं
त्यते।गवामयनेज्योतिर्गौरायुरित्यादिसंज्ञायुक्तायागाऽस्मन्नास्तेषांगणांतःपातित्वादहःसुद्वादशाहस्येतिद्वादशाहविध्यंतःप्राप्तो
नामधेयाज्ज्योतिरादेकाहविध्यंतः।तत्राविरुद्धाद्वयेपिनिक्षिप्यंतेविरुद्धेषुकिंद्वादशाहिकाःकर्तव्याःचोदकोबलवानुतनामबलीय।
स्त्वादैकाहिकाइतिसंशयेविशेषाभावादनियमः।अथवाचोदकोबलावान्फलसंबंधोत्तरकालाचेतिकर्तव्यताकांक्षाप्रयोगवाक्ये
नफलसंबंधः।नैवंतत्रनामानिश्रूयंतेयान्यपेक्षितविध्यंतमतिदिशेयुः।गणसामान्यात्तुद्वादशाहिकधर्मातिदेशएवंतत्रावग एम ९

© Dharmartha Trust J&K. Digitized by eGangotri

शा० म्यते। यासुत्पत्तिचोदनासु नामानि श्रुतानि तत्रालब्धफलत्वादसत्स्वामित्वभावापेक्षायां नातिदेशः। फलसंबंधं तु प्रतीक्ष्य पश्चादतिदिशे
१० रपि नामधेयं पूर्वावगतगुणधर्माविरोधेन प्रवर्तते। तस्माच्चोदको बलीयानितिमाम्नेभिधीयते॥ प्रत्यक्षं श्रूयते नाम चोदकस्त्वानुमानिकः
।न प्रत्यक्षविरुद्धार्थमनुमानं प्रवर्तते। यद्यपि फलसंबंधाधीनेतिकर्तव्यताकांक्षा प्रयोगवाक्ये मस्त्यनेन तथापि प्रयोगवाक्यमुत्पत्तिचोद
नावगतरूपाणि कर्माण्यालोच्य फले विनियुंक्ते तानि चालोच्यमानानि संज्ञाविशिष्टान्येवालोच्यंत इति तन्निमित्तो निर्देशः प्रत्यक्षनिसंनि
हितत्वाच्छीघ्रं गम्यते। किंच। उत्पत्तिवाक्येऽपि भावनास्वाभाव्याज्ज्ञायत एवापेक्षा। तस्मान्नाम बलीयः॥३॥ वचनादभिधानतस्तथाविदि
तं कृत्स्नमिहातिदेशनं। अनुभावचसापि सत्तया भविता नस्यविशेषचिंतनं॥ ॥इति शास्त्रदीपिकायां सप्तमस्य चतुर्थः पादः।
ध्यायश्च समाप्तः॥ ॥संवत् १८ ७५ ॥ ॥ ॥

राम
१०

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri